कर्तृत्वादेर्ज्ञानान्निवृत्तिरर्थात्सिध्यति VivaPraSaṁ. 83. 1.

**अज्ञानजलबुद्धि** ( ajñāna-jalabuddhi ) *f.* idea of water due to ignorance अज्ञानजलबुद्ध्या तु सुरां पीत्वा द्विजश्चरेत्। ब्रह्महत्याव्रतम् BṛNāraP. 28. 29.

**अज्ञानजात** ( ajñāna-jāta ) *adj.* born of ignorance (i. e. due to ignorance) स्तेयादिपापानि च कृष्णभक्तैरज्ञानजातानि लयं ह्रियन्ते PadmP. iv. 87. 22.

**अज्ञानजृम्भित** ( ajñāna-jṛmbhita ) *n.* display of ignorance अहो चाज्ञानजृम्भितम् ।...सर्वथा गहनं ह्यद: SamarāSaṁ. 9. 377.

**अज्ञानज्ञान** ( ajñāna-jñāna ) *n.* knowledge of ignorance अस्मदादीनां सर्वज्ञानेऽपि ईश्वरसार्वज्ञज्ञानवच्चाज्ञातज्ञानाभावेऽप्यज्ञानज्ञानम् Nyāyāmṛ. 362B. 5.

**अज्ञानज्ञानसंचित** ( ajñānajñāna-sañcita ) *adj.* accumulated due to ignorance and knowledge मुच्यन्ते पातकैः सर्वैरज्ञानज्ञानसंचितैः SkandP. v(3). 44. 25; v(3). 125. 31.

**अज्ञानज्ञानायोग** ( ajñānajñānāyoga ) *m.* impossibility of the knowledge of ignorance भावरूपाज्ञानावच्छेदकविषयस्याज्ञाने अज्ञानज्ञानायोगात् Nyāyāmṛ. 313A. 6.

**अज्ञानतत्कार्य** ( ajñāna-tatkārya ) *n.* ignorance and its effects तं मामजम्···यो वेत्ति विजानाति लोकमहेश्वरम्···तुरीयमज्ञानतत्कार्यवर्जितम् GītāBh. (S'aṅ.) 280. 16 (*on* 10. 3); LalitāTriBh. 269. 1 (*on* 7); एवमन्यत्रापि बुद्धियुक्तो बोध एव अज्ञानतत्कार्यं दहति IṣṭaSi. 70. 5; चितोऽज्ञानतत्कार्यावच्छेदो बन्धः PrakaVi. 29. 7; तथैवाज्ञानतत्कार्यदमनहेतोर्ज्ञानस्य दण्डत्वम् JīvanVi. 155. 15; तिष्ठन्त्वज्ञानतत्कार्यशवा बोधेन मारिताः PañcDa. 7. 282; VivaPraSaṁ. 129. 17; जीवन्मुक्तो नाम ··· अज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः VedāntSā.(Sa.) 32. 16; वाक्यार्थबोधे च सति तस्य स्वत एव प्रामाण्यात्तेनाज्ञानतत्कार्यनिवृत्त्युपपत्तौ किं विचारेण SiddhāBi. 10. 4; AdvaiSi. 252. 2; SiddhāTa. 52. 25; निवर्तकत्वात् – अज्ञानतत्कार्यसंशयादिनिवर्तकत्वात् LaCandr. 678. 20.

**अज्ञानतत्परा** ( ajñāna-tatparā ) *adj.* (*f.*) completely ignorant स्त्रीजातिरबला मूढा वस्तुतोऽज्ञानतत्परा BrahmVaiP. iv. 111. 3.

**अज्ञानतद्वासना** ( ajñāna-tadvāsanā ) *f.* ignorance and its residual impression सत्यामप्यज्ञानतद्वासनानिवृत्तौ तस्या निवृत्तेर्विनाशाभावान्नित्यत्वं द्रष्टव्यम् JīvanVi. 151. 3.

**अज्ञानतनुता** ( ajñāna-tanutā ) *f.* thinness or smallness of nescience यावदज्ञानतनुता तावच्चित्तस्य तानवम् YogVā. v. 52. 27.

**अज्ञानतन्निवृत्ति** ( ajñāna-tannivṛtti ) *f.* ignorance and its removal अज्ञानं निवृत्तम् , पुनर्न जानामीति अज्ञानतन्निवृत्त्योः प्रसिद्धत्वात् IṣṭaSi. 65. 17.

**अज्ञानतपस्** ( ajñāna-tapas ) *n.* penance based on ignorance or wrong faith मित्रमज्ञानतपसा मृत्वा यक्ष इहाजनि PārśvC. 2. 189; ततश्च्युत्वा तिर्यग्जातिषु भ्रान्त्वाज्ञानतपसासिताक्षयक्षो जज्ञे KathāK. 25. 9.

**अज्ञानतमःप्रशान्ति** ( ajñānatamaḥ-praśānti ) *f.* annihilation of the darkness in the form of ignorance प्राह प्रपन्नार्तिहरः प्रसन्नधीः । विज्ञानमज्ञानतमःप्रशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः AdhyāRā. vii. 5. 6.

**अज्ञानतमस्** ( ajñāna-tamas ) *n.* darkness in the form of ignorance, darkness of ignorance (अच्युतम्) जेतुकामो अज्ञानतमसा वृतः MahāBhā. vii. 1428*(5); अज्ञानतमसाच्छन्नो मूढान्तःकरणो नरः ViṣṇuP. vi. 5. 21 = BrahmP. 233. 21; नष्टधर्मे जगत्यस्मिन्नज्ञानतमसावृते । भ्राम्यतां भव्यसत्त्वानामुदितस्त्वं दिवाकरः PadmP.(Ra.) 3. 202; ते तस्य अज्ञानतमसो गोचराः BṛĀraUBh. 632. 3 (*on* iv. 4. 11 ); इत्यज्ञानतमश्छन्नाः स्वदोषोन्मार्गगामिनः। ··· भ्रश्यन्ति निश्चितम् KathāSaSāg. xii. 5. 216; अज्ञानतमसि च्छन्नं ज्ञानदीपमनुत्तमम् BrahmVaiP. iv. 47. 114; अज्ञानतमसारूढा निकृतिज्ञाः ··· पच्यन्ते नरके नराः VarāP. 190. 35; अज्ञानतमसाच्छन्ने यत्प्रदीपस्त्वया धृतः BhaviP. 170A. 25 (i. 116. 97); अज्ञानतमसा व्याप्तं शिष्यमुद्योतयेद्गुरुः PadmP. ii. 85. 10; यथा पापात्मनां स्वान्तमज्ञानतमसावृतम् ĀdiP. 2. 32; अज्ञानतमसाकीर्णं चेतो जन्तोः स्वयं गुरुः। ज्ञानाञ्जनेन सम्मार्ज्य करोति ब्रह्म निर्मलम् BṛDharmaP. i. 4. 3.

**अज्ञानतमस्तिरस्कृति** ( ajñānatamas-tiraskṛti ) *f.* concealment on account of the darkness of ignorance तत्राज्ञानतमस्तिरस्कृतिवशादुत्सूत्रमुत्सूत्रयं यत्किंचित्किल मय्यनुग्रहधिया शोध्यं तदेतद्बुधैः PāṇḍaC. 18. 280.

**अज्ञानतमोग्रन्थि** ( ajñānatamo-granthi ) *m.* knot of darkness of ignorance परोक्षं हि ज्ञानमतिदृढतराज्ञानतमोग्रन्थिगुण्ठनान्निमीलितस्य ··· आत्मनः ···अत्यन्तविसंष्ठुलत्वमवलम्बमानम् TattvPradī.(A.) 73. 4 (*on* 1. 55)

**अज्ञानतमोनिवृत्ति** ( ajñānatamo-nivṛtti ) *f.* removal of darkness of ignorance नमामि भक्त्या नमिनामधेयं सर्वज्ञमज्ञानतमोनिवृत्त्यै NemiNir. 1. 21.

**अज्ञानतमोनुद** ( ajñānatamo-nuda ) *adj.* removing the darkness of ignorance तस्मै नमोऽज्ञानतमोनुदाय HariVaṁ. 4*(4)

**अज्ञानतमोऽन्ध** ( ajñānatamo'ndha ) *adj.* blind on account of the darkness of ignorance येनाज्ञानतमोऽन्धस्य लोकस्योन्मीलनं कृतम् MatsyaP. 201. 32; ततोऽज्ञानतमोऽन्धस्य कावस्था जगतो भवेत् PadmP. v. 1. 42.

**अज्ञानतमोऽनुवृत्ति** ( ajñānatamo'nuvṛtti ) *f.* continuation of the darkness of ignorance उपासनीयं नितरां जनैः सदा प्रहाणयेऽज्ञानतमोऽनुवृत्तेः SiddhāRa. 6 (74. 3)

**अज्ञानतरु** ( ajñāna-taru ) *m.* tree of nescience सर्वापदामेकसखीमज्ञानतरुमञ्जरीम् । अनर्थसार्थजननीमविद्यामलमुद्धर YogVā. iv. 41. 38.

**अज्ञानतरुशातन** ( ajñānataru-śātana ) *adj.* [ *f.* –ī ] cutting off of the tree of ignorance परं विवर्धनं बुद्धेरज्ञानतरुशातनम् । ··· विद्धि साधुसमागमम् YogVā. ii. 16. 5; Subhāṣi. 210; सुखदा ज्ञानसंप्राप्तिरज्ञानतरुशातनी YogVā. v. 13. 11.

**अज्ञानतस्** ( ajñāna-tas ) *adv.* **A** unwillingly, inadvertantly, unintentionally (sin, crime etc.) दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतोकृतम् ṚV.(Khila) iii. 10. 8; सः (कर्णः) ··· ब्रह्मवादिनः। जघानाज्ञानतः पार्थ होमधेनुम् MahāBhā. xii. 2. 20; अह्ना यदेनः क्रियते इन्द्रियैर्मनसापि वा। ज्ञानादज्ञानतो वापि MahāBhā. 1*. 496; xiv. App. I. 4(2981); अज्ञानतश्चान्द्रायणद्वयं कुर्यात् ViṣṇuSm. 53. 6; यः ··· चण्डालं स्पृशेत्। ··· अज्ञानतः वापि तस्य वक्ष्यामि निष्कृतिम् YamaSm. 2; यद्गृहस्थार्जितं पापं ज्ञानतोऽज्ञानतोऽपि वा। निर्दहिष्यति तत्सर्वम् ··· यतिः VṛGautaSm. 588. 15 (12); मामसम्भाष्याज्ञानत एव शयानस्य शापोत्सर्गमसौ ··· चकार ViṣṇuP. iv. 5. 10; अज्ञानतः कृते दण्डं पातयन्ति बुधा यदि। बुधेभ्यस्तम(? द)हं मन्ये वरमज्ञानिनो नराः MārkP. 112. 19; BrahmāṇḍP. iii. 7. 75; ज्ञानतोऽज्ञानत इति प्रमादकृते बुद्धिपूर्वं चाविशेषेण हिंसनात् ManuBh. ii. 197. 4 (*on* 8. 288); द्रव्याणि यो हरेद् यस्य ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पाद्य तुष्टिं तु राज्ञे दद्यात् AgniP. 226. 33; अहोरात्रं च याञ्जन्तून्हिनस्त्यज्ञानतो यदि। तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान्षडाचरेत् ViṣṇuDhaP. ii. 131. 36; BṛNāraP. 9. 116; महतां दर्शनं ब्रह्मन् जायते न हि निष्फलम्। द्वेषादज्ञानतो वापि BrahmP. 163. 38; (ध्वजः) विधूतो हन्ति वातेन दातुरज्ञानतः कृतम् । पापम् BhaviP. 114A. 9 ( i. 64. 25 ); 157A. 25 ( i. 103. 41 ); 161A. 5 ( i. 107. 13 ); पुरुषो यः स्त्रियं हन्यात् ज्ञानतोऽज्ञानतोऽपि वा DevīBhāP. vii. 25. 77; PadmP. ii. 29. 11; iii. 4. 24; देही ··· ज्ञानतोऽज्ञानतो वापि ··· । गङ्गामृत्युमवाप्यैव परं पदमवाप्नुते BṛDharmaP. i. 56. 7; i. 56. 18; भयादज्ञानतोऽपि वा। हर इत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते SaurP. 7. 31; भाद्रशुक्लचतुर्थ्यां यो ज्ञानतोऽज्ञानतोऽपि वा। अभिशापी भवेच्चन्द्रदर्शनात् GaṇeP. i. 61. 25; अज्ञानतः सुरादिकं भक्षयित्वा द्विजातयः पुनरुपनयनमर्हन्ति DīpKa. 98. 10 (*on* 3. 255); 99. 10 (*on* 3. 259); 102. 5 (*on* 3. 269); ManvaVi. 253. 27 (*on* 2. 220); अज्ञानतस्तथा कृतं मया। मम प्रायश्चित्तं दापयितव्यम् SamyaKau. 45. 10; अज्ञानतः कृते विप्र तत्प्रसादेन नश्यति SātvaT. 7. 54; अज्ञानतः ब्राह्मणेन मुक्तम् VetāPañ.( S'i. ) 33. 19; अज्ञानतः संसर्गे तु षड्वार्षिकमेव VīraMi. 981. 28 (*on* 3. 261); यद्यप्यज्ञानतस्तथापि ब्रह्मवध्यादोषमावहेदेव Manmatho. 2. 17( 16 ) ( 433. 16 ); **B** unknowingly, ignorantly, without understanding ब्राह्मणान्नं यदुच्छिष्टमश्नात्यज्ञानतो द्विजः।··· जपं कृत्वा विशुध्यति AtriS. 70; ĀpaSm. 5. 5; स्नेहाद्वा यदि वा लोभाद् भयादज्ञानतोऽपि वा। कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति LikhiSm. 77; तस्मादज्ञानतो वापि मया भक्त्यैव संस्तुतः। प्रीतश्च भव BrahmāṇḍP. ii. 25. 31; दैवादज्ञानतो वा···नाप्नुवन्ति स्वहिततरमहाभेषजान्यप्युदाराः KalyāKā. 6. 66; 11. 135; लिप्सतेऽज्ञानतो लब्धं कण्ठे चामीकरं यथा NaiṣkaSi. 22. 4; विषमविशेषणोपात्तं ज्ञानतोऽज्ञानतश्च मरणाय कल्पत एव ManuBh. ii. 383. 8 (*on* 11. 45) इदमज्ञानतः कृतम् Hitopa. 3. 15(4); ज्ञानतोऽज्ञानतो वापि भजतां कामदो मनुः KulārT. 3. 87; अज्ञानतो वापि द्विजो बौद्धालयं विशेत् BṛNāraP. 14. 71; DevīBhāP. ix. 45. 54; (ये) नामानि च महेशस्य गृणन्त्यज्ञानतोऽपि वा SaurP. 3. 13; अज्ञानतः शमीपत्रैस्त्वयापूजि विनायकः GaṇeP. ii. 33. 45; अज्ञानतो वापि भजन्तु लोकांस्तानेव योगैरपि चाधिगम्यान् AdhyāRā. vii. 9. 63; तथाप्यज्ञानतो नाथ मया पर्यनुयुज्यसे TrisaS'aPuC. ii. 6. 633; अज्ञानतः विक्रेतुरस्वामित्वाज्ञानतः SmṛtiCan. iv. 500. 7; जारश्च यस्याज्ञानतो गृहे स्थितस्तस्य गेहे नाद्यात् ManvaMu. 184. 25 (*on* 4. 216); ज्ञानादज्ञानतो वापि विष्णुनिन्दापरायणम् BṛBrahmaS. iii. 7. 82; त्वञ्चाहञ्चायमित्थं व्यवहरति यदज्ञानतः सर्व एव Vidvanmo. 2. 14; यन्त्रं संहरयामि यामि भगवन् यक्षोऽहमज्ञानतो बालामद्य समागतोऽस्मि VasaTi. 30. 8; **C i** out of ignorance, due to lack of knowledge चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रः LaS'ātāSm. 155; 168; सूक्ष्मत्वादतिलोभाच्च प्रकृत्याज्ञानतस्तथा। कामलक्ष्म तु दुर्ज्ञानं स्त्रीणां तद्भावितैरपि KāmSū. 323. 3 (6. 2); ज्ञानतोऽज्ञानतो वापि यथोक्तं न तु तन्मया। तत्सर्वं पूर्णमेवास्तु PauṣkS. 30. 150; ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया। तत् सर्वं पूर्णमेवास्तु PāraS. 12. 388; ज्ञानतोऽज्ञानतो वापि यावद्देहस्य धारणम्। तावद्वर्णाश्रमाचारः BrahmāṇḍP. iii. 43. 58; हतं ज्ञानं क्रियाहीनं हतश् चाज्ञानतो नरः CāṇaNīDa. 8. 8; ज्ञानतोऽज्ञानतो वापि यन्मया